संधेर्नाम्नः समासस्य वृत्तेस्तिङ्कृतोरपि ।
संक्षेपाद्[illegible] प्रक्रियावतारो ॥ १ ॥

विषयाणामेषामेतादृश्यवतारिता प्रक्रियाऽऽचार्यवरेण यथा सतत-प्रयुज्यमानानां तेषां न कस्यचिदवशेषो यो हि नोदाहृतोऽस्यां । उपलभ्यते चास्यां प्रक्रियांतरानुपलभ्यमाना सुसमीचीनानघा रीतिर्य-दुदाहृताः सौगम्याय संधिषु पूर्वावस्थाः षड्लिंगी शब्दोत्पादका धात-वस्तथाऽजंतहलंताशेषशब्दाः समासे विग्रहास्तद्धिते सार्थप्रत्यया भिद्यंते धातूनां सर्वरूपाणि कृदंते चार्थपुरस्सरमुख्यमुख्यविषयाः । नास्ति कश्चिदवशिष्टोऽजंतेषु हलंतेषु वा शब्दो यस्य नोदाहृता रूप-नयनरीतिः । एवमतिहितकारिण्याः निखिलव्याकरणांगसुशोभितायाश्चास्याः कर्ता सुगृहीतनामधेयो महनीयपादो श्रीमदाचार्यवरो गुणनंदी कदा धरामंडलमिमं मंडयामास स्वशरीरमंडनेनेति न पार्यते निर्णेतुं जैनेतिहासप्राप्त्यप्राप्तितयेति महद्दुःखेनावधेयं, परं तथापि नंदिसंघ-पट्टावलिलेखमनुसृत्य शक्यते वक्तुं यदनेनाचार्यवरेण जैनेंद्रसूत्रपाठ-निर्मातुः पूज्यपादपूज्यपादाचार्यशिष्यशिष्येण भाव्यं । तदनुसारतोऽस्य समयोऽपि [illegible] तमे संवत्सरे संभाव्यते ।

नासीदस्योत्तरखंडे भारतस्यास्याः सर्वोपकारिण्याः प्रक्रियायाः प्राक् प्रकाशनात् । अलभ्यत्र संख्यादिपंचवस्तुसमन्वितान्वितार्था पंचवस्तु नाम्नी लघीयसी प्रक्रिया सा हि न व्याकरणसर्वस्वप्रदीपिका छात्र-जनातिहितकारिणीत्यतो नाध्ययनाध्यापने प्राचरन् , नापि प्राचारयत प्रचारकैः । समवलोक्य चेमामेतादृशीमन्यामप्याचार्यकृतामनुपलभ्यमा-नामुद्दिधीर्षुर्जैनेंद्रव्याकरणं लब्धवर्णसंदोहस्सांप्रतिकपंडितसाहाय्येना-भिनवां प्रक्रियामुदचिकीर्षत् । परं न तत्र सततं विघ्नव्यूहव्याहन्यमान-तया साफल्यमुपेयिवान् । अत्रांतराल एवाश्रांतपरिश्रमणोद्दिधीर्षया

५१६ ॥ **सास्य पौर्णमासीति ख्यौ ६।२।२३** । सेति षष्ठीसमर्थादस्येति षष्ठ्यर्थे यथाविहितं ख्यो भवति यद् तद् षष्ठीसमर्थं सा चेत् पौर्णमासी । इतिशब्दो विवक्षार्थस्तेन मासेऽर्द्धमासे संवत्सरे संवत्सरपर्वणि वा स्यः । स्यांतेन चेत्संज्ञा गम्यते । पूर्ववन्म्ब्धे । पौषो मासः, पौषोऽर्द्धमासः, पौषः संवत्सरः । एवं–माघः ॥ अर्हन् देवताऽस्येति विगृह्य–सास्येति वर्तमाने—

५१७ ॥ **देवता । ३ । २ । १६** । सेति षष्ठीसमर्थादस्येति षष्ठ्यर्थे यथाविहितं ख्यो भवति यद् तद् षष्ठीसमर्थं सा चेत् देवता भवति । पूर्ववदन्यत् । आर्हतः । एवं–जैनः । ऐंद्रं हविः ॥ अग्निश्च विष्णुश्च देवताऽस्येति विगृह्य द्वंद्वे कानि च कृते देवतार्थेऽण् । "द्वलिसिघुभगे द्वयोः" इति वर्तमाने—

५१८ ॥ **देवतानां ङानि ५ । २ । २६** । देवतानां द्वयोः पदयोः ङानि विषये ऐप् भवति । आग्नावैष्णवं । एवं–आग्निमारुतं आग्निवारुणं । "नैप्यावि॰भिर्द्वंद्वे" इति कानीत्वयोर्निषेधः । अग्नेंद्रौ देवतेऽस्येति विगृह्य—अण् ।

५१९ ॥ **नेंद्रवरुणस्यात् । ५ । २ । २७** । अवर्णांतात् देवतार्थात् परस्य इंद्रशब्दस्य वरुणस्य चाष्वामादेरच् ऐप् न भवति । आग्नेंद्रः । एवं–ऐंद्रावरुणः । त्रिलिंगेष्वपि योज्यं ॥ महेंद्रो देवतास्येति विग्रहे–

५२० ॥ **महेन्द्राद् घाण् च । ३ । २ । ३१** । महेन्द्रशब्दाद्देवतार्थे घ अण् इत्येतौ ख्यौ भवतः चकाराच्छश्च । घस्य इय्, छस्य ईय् । महेंद्रियः । माहेंद्रः । महेंद्रीयः ॥ को देवताऽस्येति विग्रहे–

५२१ ॥ **कसोमाट् ट्यण् । ३ । २ । १२** । कसोमाभ्यां दे-

एध्येत । एध्यतां । पच्यते । अपच्यत । पच्येत । पच्यतां । नंद्यते । अनंद्यत । नंद्येत । नंद्यतां । "हलुकः क्ङित्यनिदितः, इति नखं । प्रध्वस्यते । प्राध्वस्यत । प्रध्वस्येत । प्रध्वस्यतां । एचोऽश्या इत्यधिकृत्य—

७४६ ॥ ध्योऽशिटि । ४ । ३ । ४५ । ध्येञो धेरशिटि अशिद्विषये आत्वं भवति । स्वब्यच्छ्र्यादेरिति साचो यण इक् । इको यणिक इति दीः । धीयते । अधीयत । धीयेत । धीयतां । "यि क्ङित्ययक्" इति वर्तमाने—

७४७ ॥ दीङ्च्व्यकृद्दे । ५ । २ । १४८ । ध्यावकृद् यकारे अगयकारे च गोर्दीर्भवति । हूयते । अहूयत । हूयेत । हूयतां हायते । अहायत । हायेत । हायतां । "ईथ" इति वर्तमाने—

७४८ ॥ भूमास्थागापाहाक्सां हलि । ४ । ४ । ६९ । भूसंज्ञकानां मा स्था गा पा हाक् सा इत्येतेषां च धूनां हलादौ क्ङिसगे परतः ईत्वं भवति । विधीयते । व्यधीयत । विधीयेत । विधीयतां । अयते । आयत । अयेत । अयतां ।

७४९ ॥ यि क्ङित्ययक् । ५ । २ । १४५ । शीङो यकारादौ क्ङिति परतः अयकादेशो भवति । अधिशय्यते । अध्यशय्यत । अधिशय्येत । अधिशय्यतां । क्ङित्येऽदोऽगे अगियरिति वर्तमाने-

७५० ॥ ब्रुवस्तेर्वच्भूः । १ । ४ । १११ । ब्रुञोऽस्तेश्च यथासंख्यं वच् भू इत्येतावादेशौ भवतोऽगे परतः । स्वब्यच्छ्र्यादेरिति साचो यण इक् । उच्यते । औच्यत । उच्येत । उच्यतां । दीव्यते । अदीव्यत । दीव्येत । दीव्यतां । प्रसूयते । प्रासूयत । प्रसूयेत । प्रसूयतां । सन्नह्यते । समनह्यत । सन्नह्येत । सन्नह्यतां । अभिषूयते । अभ्यषूयत । अभिषूयेत । अभिषूयतां । अस्यते ।

७७७ ॥ भुवोऽत् । ५ । २ । १९९ । भवतेरस्य लिट्य-कारादेशो भवति । इत्युकारस्यात्वं । झलो जशीति भकारस्य बकारः । बभूव । बभूविव । बभूविम । बभूविथ । बभूवथुः । बभूव । बभूव । बभूवतुः । बभूवुः । इत्य–लिड्टेरिरित्येत्वं । भासः संभावः । बभूवे-रिति त्वमो वा द्वयं ।

७७८ ॥ लिटस्तझयोरेशिरे । २ । ४ । ६२ । लिटस्त-झयोर्यथासंख्यं एश् इरे इत्येतावादेशौ भवतः । पूर्ववल्लिड्वद् वुक् च कार्यं । व्यतिबभूवे । व्यतिबभूविवहे । व्यतिबभूविमहे । व्यतिबभू-विषे । व्यतिबभूवाथे । व्यतिबभूविढ्वे । व्यतिबभूविध्वे । व्यतिब-भूवे । व्यतिबभूवाते । व्यतिबभूविरे । लिड्वत्कृञोऽभीति वर्तमाने–

७७९ ॥ सधिजादिदयायासोऽनृच्छ्रर्णोः । २ । १ । ४८ । सह कृणा वर्तमानात् इजादेर्धोर्दय् अय् आस् इत्येतेभ्यश्चाम् भवति लिड्वत् कृञि परतः ऋच्छ्यूर्णोति वर्जयित्वा । कृञोऽभीति प्रत्या-हारेण कृभ्वस्तीनां त्रयाणां ग्रहणं । तस्मिन्नामंतं पदमिदमनंतरं प्रयुज्यते ।

७८० ॥ आम्वत्कृः । १ । २ । ७१ । आमंतस्यैव वत्कृञो दो भवति । इति लिटो दः । तस्य पूर्ववद्भावादि । किन्त्वा द्विश्वेप् न भवति । यणादेशस्यानिवृत्त्वेन द्वित्वं ।

७८१ ॥ उरः । ५ । २ । १८३ । चस्य ऋकारस्य अ-कारादेशो भवति । शिदादावंतस्य सुप उप् । त्यखे त्याश्रयमिति पदत्वं । तुम्मोऽमित्यनुस्वारः । वा तुक् पदांतस्येति विकल्पेन परसवर्णः । एधांचक्रे । एधांचकृवहे । एधांचकृमहे । एधांचकृषे । एधांचक्राथे । एधांचकृढ्वे । एधांचक्रे । एधांचक्राते । एधांचक्रिरे । एधांबभूव । एधांबभूविव । एधांबभूविम । एधांबभूविथ । एधांबभूवथुः । एधांबभूव ।

अमुचाव । अमुचाम । इत्यादि । अमुक्षि । अमुक्ष्वहि । अमुक्ष्महि । इत्यादि ।

८१८ ॥ वेरितः । २ । १ । ६२ । इरशब्देतो धोर्लुङि मे परतो वा अङ् भवति कर्तरि । पक्षे सिः । दे तु सिरेव । किद्वद्भावादनेप्च । अरुधं । अरुधाव । अरुधाम । इत्यादि । अरौत्सं । अरौत्स्व । अरौत्स्म । अरौत्सीः । अरौद्धं । इत्यादि । अरुत्सि । अरुत्स्वहि । अरुत्स्महि । अरुद्धाः । अरुत्साथां । अरुद्धं । अरुत्त । अरुत्साताां । अरुत्सत । अभुक्षि । अभुक्ष्वहि । अभुक्ष्महि । इत्यादि । अयुजं । अयुजाव । अयुजाम । इत्यादि । अयौक्षं । अयौक्ष्व । अयौक्ष्म । अयौक्षीः । अयौक्तं । अयौक्त । इत्यादि । प्रायुक्षि । प्रायुक्ष्वहि । प्रायुक्ष्महि । प्रायुक्थाः । इत्यादि । "धोर्णुञः„ इति वर्तमाने—

८१९ ॥ अतोऽनादेर्येः । ५ । १ । ८२ । धेः परतोऽनादेरिडादौ मपरे साविप् वा भवति । इत्यैप् । अतानिषं । अतानिष्व । अतानिष्म । अतानीरित्यादि । पक्षे-अतनिषं । अतनिष्व । अतनिष्म । इत्यादि । दत्रिवौ-भास्तयोः— उत्रिति संरिति येति च वर्तमाने—

८२० ॥ तन्भ्यस्थास्ते । १ । ४ । १५१ । तनादिभ्यः परस्य सेरुव्वा भवति थास्तयोः परतः । इत्युपि—कुङितीति वर्तमाने—

८२१ ॥ हन्यन्यमूरमूनमृगम्वनतितनां झल्यं झलि । ४ । ४ । ३९ । हनादीनां वनतेस्तनादीनां च गूनां झलादौ किङति खं परं खं भवति । इति नकारस्य खं । अतनिषि । अतनिष्वहि । अतनिष्महि । अतथाः । अतनिष्ठाः । अतनिषाथां । अतनिध्वं । अतनिढ्वं । अतत । अतनिष्ट । अतनिषातां । अतनिषत । पूर्ववद् सेरुवादि । अमनिषि । अमनिष्वहि । अमनिष्महि ।

पक्ष्यामि । पक्ष्ये । नंदिष्यामि । ध्वंसिष्ये । व्यास्यामि । व्यास्ये । ह्रोष्यामि । व्यतिह्रोष्ये । ह्रास्ये । श्रद्धास्यामि । श्रद्धास्ये । अत्स्यामि । व्यत्स्यते । शयिष्ये । वक्ष्यामि । वक्ष्ये । देविष्यामि । व्यतिदेविष्ये । प्रसविष्ये । प्रसोष्ये । नत्स्यामि । नत्स्ये । अभिषोष्यामि । अभिषोष्ये । काशिष्ये । रत्स्ये । निर्वेक्ष्यामि । निर्वेक्ष्ये । तोत्स्यामि । तोत्स्ये ।

८४१ ऋद्धनः स्ये । ७ । २ । ७० । ऋकारांताद्धन्तेश्चागे स्य इट् भवति । मरिष्यामि । व्यतिमरिष्ये । मोक्ष्यामि । मोक्ष्ये । रोत्स्यामि । रोत्स्ये । भोक्ष्ये । योक्ष्यामि । योक्ष्ये । तनिष्यामि । तनिष्ये । करिष्यामि । करिष्ये । क्रीष्यामि । क्रीष्ये । वरिष्ये । वरीष्ये । ग्रहिष्यामि । ग्रहीष्ये । चोरयिष्यामि । छादयिष्ये । लक्षयिष्ये । योजयिष्यामि । योक्ष्यामि । अर्चयिष्यामि । अर्चिष्ये । वारयिष्यामि । वरिष्यामि । वरीष्यामि । वरिष्ये । इत्यादि सप्रपंचमधिगंतव्यं ॥ लृङुदाह्रियते । गम्यादिर्वक्ष्यतीत्यविकृत्य—

८४२ ॥ लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ । ३ । ३ । १३९ । हेतुहेतुमद्भावादिर्लिङ्निमित्तं वक्ष्यते । तत्र लिङ्निमित्ते वर्त्स्यति काले लृङ् भवति क्रियायाश्चेदतिपत्तिर्भवति ।

८४३ ॥ भूते च । ३ । ३ । १४० । भूते काले लिङ्निमित्ते क्रियातिपत्तौ लृङ् भवति । टकारः पूर्ववत् । ऋकारः स्यतासी लृलुटोरिति सामान्यग्रहणार्थः । मध्ये स्यः । इडेत्यादेशाः । अडागमः । अभविष्यं । अभविष्याव । अभविष्याम । अभविष्यः । अभविष्यतं । अभविष्यत । अभविष्यत् । अभविष्यतां । अभविष्यन् । द्वाविंशौ-व्यत्यभविष्ये । व्यत्यभविष्यावहि । व्यत्यभविष्यामहि । व्यत्यभविष्यथाः । व्यत्यभविष्येथां । व्यत्यभविष्यध्वं । व्यत्यभविष्यत । व्यत्यभविष्येतां । व्यत्यभविष्यंत । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । सर्वमभ्यूह्यं ।

इति कर्तृपरिच्छेदः ।

८६२ ॥ सनीवंतर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् । ७ । २ । ४९ । इवन्तेभ्यो धुभ्यः ऋधादिभ्यश्च सनि परतः इट् वा भवति । इट्पक्षे–ख्युक्,, ईत्वेप् । दिदेविषामि । इडभावे "क्षिदूत्सनि सीकः" इति वर्तमाने–

८६३ ॥ हलि । १ । २ । १० । सकारादौ सनि परतो यो हल् तस्मिन् परे य इक् तस्य किद्वद् कार्यं भवति । इत्वेप् निषिद्धः । "च्छ्वोः शूठ् के च" इति वस्य ऊठ यण् तद्वो द्वित्वादि । दुद्यूषामि । पूर्ववदिडभावः कित्त्वं च ।

८६४ ॥ षणि चाण्यिस्नोरेवाऽस्विनत्सहः । ८ । ३ । ६१ । षणि षत्वभूते सनि परतः चादिण्णंतात् परेषां ण्यन्तानां स्विदिस्वदिसहवर्जितानां स्तौतेरेव सकारस्य षत्वं भवति । इति नियमादषत्वं । प्रसुसूषे । निनत्सामि । निनत्से ।

८६५ ॥ सुञः सनस्ये । ८ । ३ । ११७ । सुनोतेः सनि स्ये च परे षत्वं न भवति । सुसूषामि । सुसूषे ।

८६६ ॥ स्मिङ्पूङ्ऋञ्ज्वशां सनि । ७ । २ । ७४ । स्मिङ् पूङ् ऋ अंज् अश् इत्येतेभ्यः इट् भवति सनि परे । अशि-शिषे । निष्मिकिषामि । निष्मिचिषामि । निष्मिकिषे । निष्मिचिषे । "हलि" इति "किद्वद्भावादेप् न भवति । तुतुत्सामि । तुतुत्से । "ह-न्यचां सनि" इति दीः । "ऋतामिद्धोः" इति वर्तमाने–

८६७ ॥ पुवादुत् । ७ । १ । १०२ । पवर्गाद् वकाराच्च धोरवयवात् परस्य ऋकारस्य उकारादेशो भवति । रंतत्वं । "दीर्घो-ऽगुकः" इति दीः । मुमूर्षे । मुमुक्षामि । मुमुक्षे । कर्मकर्तरि—

यता । तोतुदिषीष्ट । तोतुदांचकं । अतोतुदिष्ट । अतोतुदि । तोतुदिता । तोतुदिष्यते । अतोतुदिष्यत । "रीङ् ऋतः,, इति रीङादेशः । मेम्रीयते । मोमुच्यते । रोरुध्यते । बोभुज्यते । योयुज्यते ॥

८८१ ॥ रुग्यातो लुक् । ५ । १ । २०५ । रुसज्ञकांतस्य गोर्यङ्लुपोर्यश्चस्तस्याकारांतस्य लुगागमो भवति । तस्यानुस्वारादिः । तंतन्यते । मंमन्यते । चङ्कीयते । मिर्कीयते । वेवीयते । यशिव्यादिना यण इष्ट् । यङ्लुपोरिति वर्तमाने—

८८२ ॥ रीगृत्वतो । ५ । १ । २०९ । ऋकारवतो गोर्यङि चस्य रीगागमो भवति । जरीगृह्यते । इत्यादि । सर्वं पूर्ववन्नेयं ॥ इति यङंताः । किं च—

८८३ ॥ यङः उप् । १ । ४ । ९७४ । यङो बहुलमुप् भवति । लुसे लाश्रयन्यायेन द्विल्वादि । ततो लङादिः । चर्करीतं चेत्यदादिषु मबन्तसु पाठात् यङ्लुबंतस्यादादित्वं । तेन शप उप् मविधिश्च ।

तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकान्ग्रहणं किंचित् पंचैतानि न यङ्लुपि ॥१॥

इति यङो ङित्वाद् स्थानिवद्भावेन दो न भवति । अस्य गे पित्यचि हल्युप्योरी" इति वर्तमाने—" ब्रुव ईट् " इत्यनुवर्त्य—

८८४ ॥ यङ्तुरुस्तोर्बहुलं । ५ । १ । १३२ । यङ्लुबंतात् रुस्तु इत्येतेभ्यश्च परस्य हलादेः पितो गस्य बहुलं ईडागमो भवति । पित्त्वेवन् न ङित्सु । अस्य धादित्वात् । बोभवीमि । बोभोमि । बोभूवः । बोभूमः । बोभवीषि । बोभोषि । बोभूथः । बोभूथ । बोभवीति । बोभोति । बोभूतः । बोभवति । थविस्तेरिति झेर्जुस् । अबोभवं । अबोभूव । अबोभूम । अबोभवीः । अबोभूः ।

नानद्धि । सोषवीति । सोषोति । अशाशीति । अशाष्टि । चेचयीति । चेचेति । तोतुदीति । तोतोत्ति । रीगृत्वतामिति वर्तमाने—

८८६ ॥ रुग्रिग् चोपि । ५ । २ । २१० । ऋवतो गोर्यङ्कुपि चस्य रुग् रिग् चागमो भवति । मर्मरीति । मरिमरीति । मरीमरीति । मर्मर्ति । मरीमर्ति । मरिमर्ति । चर्करीति । चरिकरीति । चरीकरीति । चर्कर्ति । चरिकर्ति । चरीकर्ति । जर्गृहीति । जर्गर्ढि । इत्यादि नेयं । वृतुञ् वृत्तौ । वर्वृतीति । वर्वर्ति । इत्यादि । गृधु अभिकांक्षायां । जर्गृधीति । जर्गर्द्धि । इत्यादि । लङि—अजगृद्ध । इडभावे--ध्युङः,, एप् । सिपः खं । भष्भावः । ततो धकारस्य जश्त्वं । "सिपि रिवा" इत्यधिकृत्य—दः,, इति विकल्पेन रिः । रो री-ति पूर्वस्य रखं । द्रिखेऽणः " इति दीः । अजर्घाः । अजगृद्धं । अजगृद्ध । अजगृधीत् । अजघार्त्त । अजगृद्धां । अजगृधुः । इत्या-दि सप्रपंचप्रयोगतः प्रयोज्यं ॥ इति यङ्लुबंताः ॥

भवति कश्चित् तं भवंतं भावितस्य भवनं वा प्रयोजयतीति वि-गृह्य-णिजिति वेति च प्रस्तुत्य—

८८७ ॥ हेतुमति । २ । १ । ३९ । हेतुमति व्यर्थे धोर्वा णिच् भवति । णकार ऐवर्थः । चकारो णाविति सामान्यग्रहणा-विघातार्थः । ऐवावादेशौ । धुसंज्ञा च । ततः पूर्ववल्लडादयः । भावयामि । भावयावः । भाव यामः । इत्यादि ।

८८८ ॥ णिचः । १ । २ । ८६ । णिजंताद्धोः फलेशे कर्तरि लस्य दो भवति । भावये । भावयावहे । भावयामहे । इत्यादि । कौ—यकि णेः खं । भाव्यते । अभाव्यत । भाव्येत । भाव्यतां । कर्मकर्तरि—दाधिणिश्रिश्राथिबघूञोऽश्च ञिश्चेति णिजंतद्रा

नंदत् । नंदंती । ध्वंसमानः । ध्वंसमानं । ध्वंसमाना । व्ययन् । व्ययत् । व्ययंती । इत्यादि । "न शाद्,, इति नुमो निषेधः । जुह्वत् । जुह्वतौ । " वा नपः,, इति थे वा नुम् । जुह्वत् । जुह्वती । जुह्वंति, जुह्वति कुलानि । जुह्वती, जुह्वत्यौ । उज्जिहानः । दधत् । अभिदधानः । अदन् । अदत् । अदती । भा दीप्तौ—भान्, भात् । "शीम्योराद्,, इति वा नुम् । भांती । भाती । व्यत्यददानः । व्यत्यददानं । व्यत्यददाना । शयानः । शयानं । शयाना । श्रुवन्, श्रुवत्, श्रुवती । श्रुवाणः, श्रुवाणं, श्रुवाणा । दीव्यन्, दीव्यत्, दीव्यंती । " शप्श्याद्,, इति नित्यं नुम् । व्यतिदीव्यानः ॥ प्रसूयमानः २ । नश्यन् २ । नश्यमानः २ । क्षुभ्नन् । क्षुभ्नानः । [illegible] । चिन्वन् । चिन्वानः । तुदन्, तुदमानः २ । म्रियमाणः । मुंचन् । मुंचमानः । रुंधन् । रुंधानः । भुंजानः । प्रयुंजन्, प्रयुंजानः । तन्वन्, तन्वानः । मन्वानः । कुर्वन्, कुर्वाणः । क्रीणन्, क्रीणानः । वृणानः । गृह्णन्, गृह्णानः । चोरयन् । छादयमानः । लक्षयन्, लक्षयमाणः । योजयन्, योजन् । अर्चयन् । अर्चयमानः । वारयन्, वारयमाणः । इत्यादि ज्ञेयं । भावे—भूयमानं देवदत्तेनेत्यादि । सर्वत्रैकवचनांतं नपुंसकलिंगमेव भवति । एध्यमानमस्माभिः । शय्यमानं युवाभ्यामित्यादि ॥ कर्मणि—अभिभूयमानो भानू राहुणा । अभिभूयमानं कर्म ध्यानेन । अभिभूयमाना बुद्धिः कर्मणा । इत्यादि त्रिलिंगं ॥ कर्मकर्त्तरि—अनुभूयमानः स्वयमेव । इत्यादि । लृटि च—भविष्यन्, भविष्यत्, भविष्यती, भविष्यंती वा । इत्यादि । व्यतिभविष्यमाणः । इत्यादि ॥ भावे—भविष्यमाणं । इति । अभिभाविष्यमाणः, अभिभविष्यमाणो देवदत्तो गुरुदत्तेनेत्यादि । तथा—एधिष्यमाणः । पक्ष्यन् ३ । पक्ष्यमाणः ३ । नंदिष्यन् । इत्यादि । होष्यत् । व्यतिहोष्यमाणः । कर्म-

हानिष्यमाणं । होष्यमाणं । हास्यमानः । कौ—हायिष्यमाणं । हास्यमानं वा । श्रद्धास्यन् , श्रद्धास्यमानः । कौ—श्रद्धायिष्यमाणं, श्रद्धास्यमानं वा । अस्यन् । अस्यत् । अस्यती, अस्यंती वा । इत्यादि नेयं ।

१२६ ॥ लिटः क्वसुकानौ ।२।२।१०३। धोः परस्य लिटः स्थाने क्वसु कानावादेशौ भवतः । क्वसुर्मसंज्ञः । कानो दसंज्ञः । उकारः उगित्कार्यार्थः । ककारः कित्कार्यार्थः । क्वसौ दे नियमाद् इट् प्राप्तः ।

१२७ ॥ क्वस्येकाच्घसः । ५ । १ ।१११। आकारांतात् एकाच् घस एव क्वसाविट् भवति नान्यत्र । इति नियमान्निषिद्धः । ततः स्वादयः । बभूवान् । बभूवांसौ, बभूवांसः । इत्यादि । शसादावजादौ—

१२८ ॥ वसोर्वस्योश् ।४।४।११७। गोर्भस्यावयवो यो वस् तस्य च यो वकारस्तस्य उशादेशो भवति । इत्युकारः । बभूवुषः । बभूवुषा । बभूवद्भ्यां । बभूवद्भिरित्यादि । बभूवुषी । इत्यादि । काने—व्यतिबभूवानः । इत्यादि । कौ—बभूवानं देवदत्तेन । बभूवान इत्यादि । "हल्मध्ये लिड्यतः" इत्येत्वचत्वे । ततः एकाच्त्वादिट् । पेचिवान्, पेचिवत्, पेचुषी । पेचानः । ननंद्वान्, ननंद्वत्, ननंदुषी । संविविवान्, संविविवत्, संविव्युषी । इत्यादि । जुहुवान्, जुहुवत्, जुहुवुषी । व्यतिजुहुवानः । जुहवांचकृवान् । जुहवांचकृवत्, जुहवांचकृषी । व्यतिजुहवांचक्राणः । "इटि चात्व" इत्यात्वं । अभिदधिवान्, अभिदधिवत्, अभिदधुषी । अभिदधानः । जक्षिवान्, जक्षिवत्, जक्षुषी । व्यतिजक्षाणः । कौ—जक्षाणं देवदत्तेन । जक्षाणः । घस्लादेशाभावे—द्वित्वे दीर्घे कृते—एकाच्त्वादिट् । आदिवान्, आदिवत्, आदुषी । व्यत्यादानः । आदानं देवेन । आदानः ॥ कृतयणादौ द्वित्वे दीर्घे च पूर्ववदिट् ।

ब्रह्मणः । ब्रह्म उद्यते ब्रह्मणा उद्यते इति ब्रह्मोद्यं । ब्रह्मवद्यं । सत्य-मुद्यते इति सत्योद्यं । सत्यवद्यं ।

९४३ ॥ भूयहत्याग्निचित्या भावे । २ । १ । भूय हत्या अग्निचित्या गिवर्जिते सुपि वाचि क्यबंता निपात्यंते भावे । भूयेति भवतेर्नपुंसके भावे क्यप् । ब्रह्मणो भवनं ब्रह्मभूयं गतः । देवभूयं गतः । हत्येति हंतेः स्त्रियां भावे क्यप् नकारस्य च तकारो निपात्यः । ब्रह्मणो हतिः ब्रह्महत्या । अग्निचित्येति अग्निपूर्वाच्चिञः स्त्रियां भावे क्यप् तुक् च । अग्निचित्या । अग्निग्रहणमन्यसुब्निवृत्यर्थं ।

९४४ ॥ शास्स्त्वेतिवृञ्दृजुषः । २।१।११३ । शास स्तु एति वृञ् दृ जुष् इत्येतेभ्यो धुभ्यः क्यप् भवति । न यो वर्तते चानुकृष्टत्वात् सुप्योगेरित्येव । शासु अनुशिष्टौ ।

९४५ ॥ शासोऽङ्हलीत् । ४।४।३५ । हलकः क्ङिति चानुवर्तते । शासो गोऽङ्गो अङि हलादौ च क्ङिति परतः इकारादेशो भवति । "शास्वसुघसां" इति षत्वं । शिष्यः । स्तुञ् स्तुतौ । स्तुत्यः एतीति इणिको ग्रहणं । इण् गतौ । इत्यं । इक् स्मरणे । इत्यं । इङ् अध्ययने । अधीत्यं । वृञ् प्राग्वृत्वः । प्रवृत्यः । दृञ् अनादरे । आ-दृत्यं । जुषिञ् प्रीतिसेवनयोः । जुष्यं ।

९४६ ॥ ऋदुकोऽक्लृपचृतृचः । २ । १ ।११४ । क्लृप् चृति ऋचिवर्जितेभ्यः ऋकारोको धुभ्यः क्यप् भवति । वृतुञ् वर्तने । वृत्यं । मृदुङ् शब्दकुत्सायां । मृद्यं । अक्लृपचृतृच इति किं ? कल्प्यं । चर्त्यं । अर्च्यं । ण्यापवादः ।

९४७ ॥ ण्यः । २।१।१२१ । धोर्ण्यस्त्वो भवति । णकार ऐवर्थः । कार्यं । हार्यं । यंच् युज् भुजिष्यतो ण्यः ।

९४८ ॥ चजोः कुर्घिण्ये तेऽनिटः । ५।२।९४ । तेऽनिटो

डुधाञ्-त्रिहित्रिमं । डुकृञ्-कृत्रिमं ।

१०५६ ॥ घो मांः किः । २ । ३ । ७८ । घौ वाचि भुसंज्ञकात् धोर्भावेऽकर्त्तरि किर्भवति । प्रधानं प्रधीयते इति धेटो धातो वा-प्रधिः । एवं विधिः । निधिः । उपाधिः । समाधिः । आदानं आदीयतेऽस्मात्-इति दाखूपाणां चतुर्णामन्यतमस्मात् किः । आदिः ।

१०५७ ॥ कर्मण्याधारे । २ । ३ । ७९ । कर्मणि वाचि भोरकर्त्तरि आधारे किर्भवति । जलं धीयतेऽस्मिन्निति जलधिः । शरधिः । इषुधिः । वारिधिः ।

१०५८ ॥ युजयद्विच्छप्रच्छस्वपरक्षो नङ् । २ । ३ । ७६ । युज् यत् विच्छ् प्रच्छ् स्वप् इत्येतेभ्यो भावेऽकर्तरि नङ् भवति । युजनं—युज्ञः । यत्नः । विश्नः । प्रश्नः । स्वप्नः । रक्ष्णः । विच्छेरनेवर्थ विस्फरणं ।

१०५९ ॥ याच्ञा । २ । ३ । ७७ । याच्ञेति स्त्रियां भावेऽकर्तरि नङ् निपात्यते । याचनं—याच्ञा ।

१०६० ॥ स्त्रियां क्तिः । २ । ३ । ८० । स्त्रीलिंगे भावेऽकर्तरि वर्तमानाद्धोः क्तिर्भवति । घञादेरपवादः । दृश्-दृष्टिः । सृज्—सृष्टिः । चितिः । कृतिः । भ्रांतिः । शांतिः । "क्तस्य अल्ल्कयो: क्तिति" इति दीर्घः । कीर्तिः ।

१०६१ ॥ शीङ्विन्निषन्निपद्सुञ्समजः । २ । ३ । ८१ । शीप्रभृतिभ्योऽकर्त्तरि स्त्रियां खौ क्यप् भवति । शेरतेऽस्यामिति शय्या । यंत्यस्यामनयेति वा इत्या । विदंत्यस्यां तया वा कर्मकामौ इति विद्या । निषदंत्यस्यां निषद्या । निपद्यतेऽस्यां निपद्या । मन्यतेऽनया मन्या । सुनोत्यस्यां सुत्या । समजंत्यस्यां समज्या । संशीतिः ।

पक्षे-ऊठादिः । चूत्वा । चूत्वा । श्वस्त्वा । "दोसोमास्थां ति किति" इतीत्वं । सित्वा । मित्वा । दो दद्भोः इति ददादेशः । दत्त्वा । "धाञो हिः" हित्वा ।

१०८९ ॥ हाकः क्त्वि । ५ । २ । १६१ । हाको हिरादेशो भवति क्त्वात्ये । हित्वा राज्यं । "क्त्यिपेऽदो जग्धिः" इति जग्ध्वा ।

१०९० ॥ प्यस्तिवाक्से क्त्वः । ५ । १ । ३१ । तिसे वाक्से क्त्वादयस्य प्यादेशो भवति । प्रस्तुत्य । प्रकृत्य । अभिकृत्य । उच्चैः कृत्याचष्टे । नानाकृत्य गतः । तिवाक्से इति किं ? अकृत्वा । परमकृत्वा ।

१०९१ ॥ प्ये । ४।४।४० । हनादीनां प्ये परे खं भवति । प्रहत्य । प्रमत्य । प्रवत्य । प्रतत्य ।

१०९२ ॥ वा मः । ४ । ४ । ४१ । मकारांतानां हनादीनां प्ये परे खं भवति वा । नियत्य, नियम्य । विरत्य, विरम्य । आगत्य, आगम्य ।

१०९३ ॥ प्ये च । ४ । ३ । २० । दीङो नित्यमात्वं भवति प्ये एप्विषये च । उपदाय । अवदाय । उपदाता ।

१०९४ ॥ मिञ्मीञोरखाचि । ४ । ३ । ५० । मिञ् मीञ् इत्येतयोरात्वं भवति प्ये खाज्वर्जिते एप्विषये च । निमाय गतः । प्रमाय गतः ।

१०९५ ॥ वा लीङ्लिनात्योः । ४ । ३ । ५१ । लिङ्लिनात्योः आत्वं भवति वा प्ये खाज्वर्जिते एप्विषये च । विलाय, विलीय ।

१०९६ । णेः । ४ । ४ । ५७ । णेः खं भवत्यगे । प्रकार्य । उत्तार्य । उपभोज्य । अनुभाव्य । अध्याप्य । प्रस्थाप्य । प्रतिपाद्य ।

